गुप्तः ५ पीवरः ६ कमठः ७ जलगुल्मः ८। इति जटाधरः ॥ अस्य मांसादिगुणपर्य्यायान्तरौ कच्छपशब्दे द्रष्टव्यौ ॥ * ॥ (तल्लक्षणं यथा,— वृहत्संहितायाम् ६४ अध्याये ।

"स्फटिकरजतवर्णो नीलराजीव चित्रः
कलशसदृशमूर्त्तिश्चारुवंशश्च कूर्म्मः ।
अरुणसमवपुर्व्वा सर्षपाकारचित्रः
सकलनृपमहत्त्वं मन्दिरस्थः करोति ॥
अञ्जनभृङ्गश्यामवपुर्वा विन्दुविचित्रोऽव्यङ्गशरीरः ।
सर्पशिरा वा स्थूलगलो यः सोऽपि नृपाणां राष्ट्रविवृद्ध्यै ॥
वैदूर्य्यत्विट् स्थूलकण्ठस्त्रिकोणो
गूढच्छिद्रश्चारुवंशश्च शस्तः ।
क्रीड़ावाप्यां तोयपूर्णे मणौ वा
कार्य्यः कूर्म्मो मङ्गलार्थं नरेन्द्रैः" ॥

परमेश्वरः। यथाह ऋग्वेदभाष्योपक्रमणिकायां दयानन्दः ।

"परमेश्वरेणेदं सकलं जगत्क्रियते तस्मात् तस्य कूर्म्म इति संज्ञा" ॥ प्रजापतेरवतारविशेषः । यथा, शतपथब्राह्मणे । ७।५।१।५।

"स यत् कूर्म्मो नाम एतद्वा रूपं कृत्वा प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद् यदकरोत् तस्मात् कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्य इति। स यः स कूर्म्मोऽसौ स आदित्यः" ॥ इति ॥ * ॥)

वाह्यवायुविशेषः। यथा,—

"उन्मीलने स्मृतः कूर्म्मो भिन्नाञ्जनसमप्रभः" ॥

इति शारदातिलकटीका ॥ * ॥ मुद्राविशेषः । यथा,—

"वामहस्तस्य तर्ज्जन्यां दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्ज्जन्यां वामाङ्गुष्ठेन योजयेत् ॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पितृतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्य्याद्दक्षिणस्य करस्य च ॥
कूर्म्मपृष्ठसमं कुर्य्याद्दक्षपाणिञ्च सर्व्वतः ।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि" ॥

इति तन्त्रसारः ॥ * ॥ (आसनविशेषः । यथा हठयोगदीपिकायाम् । १ । २२ ।

"गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ।
कूर्म्मासनं भवेदेतदिति योगविदो विदुः" ॥)

सत्ययुगे समुद्रमन्थनकाले मन्दरपर्व्वतधारणार्थं कच्छपरूपभगवदवतारविशेषः । यथा,—

"क्षीरोदमध्ये भगवान् कूर्म्मरूपी स्वयं हरिः" ॥

इति पद्मपुराणम् ॥ अपि च ।

"विलोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः ।
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार" ॥

इति श्रीभागवतम् ॥ * ॥ ("काश्यपपत्न्याः कद्रोः पुत्रेषु एकः । स च नागविशेषः । यथा, महाभारते । १ । ६५ । ४१ ।

"शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्म्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः" ॥)

कूर्म्मचक्रं, क्ली (कूर्म्माकारं चक्रम् । मध्यपदलोपी कर्म्मधारयः ।) ऋषिकर्म्मोक्तकच्छपाकारचक्रम् । तस्याकारो यथा,—

"प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदं यथाक्रमम्" ॥

तत्र नक्षत्रन्यासक्रमः ।

"मध्यप्रागग्नियाम्यादिकृत्तिकादित्रयत्रयैः ।
क्रूरवेधयुतैस्तैस्तु पीड्यन्ते तन्निवासिनः" ॥

तत्र वेधो यथा,—

"पूर्व्वापरे भवेद्वेधो वेधश्चोत्तरदक्षिणे ।
ईशाने राक्षसे वेधो वेध आग्नेयमारुते ।
तारात्रयान्वितं तत्र सौरिं यत्नेन चिन्तयेत्" ॥

तत्र वेधादिजन्यदोषाः ।

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
स्वचक्रं परचक्रञ्च सप्तैते सम्भवन्ति च ॥
एवं देशगृहग्रामक्षेत्रनामर्क्षतो वदेत् ।
तथा च यत्र नक्षत्रे दिव्यपार्थिवनाभसाः ॥
दृश्यन्ते सुमहोत्पाताः स्वां दिशं तत्र पीड़येत् ।
सौरिर्बलाधिपो दुष्टः स्वल्पवीर्य्यः शुभावहः ॥
एकदा पीड़येद्दृश्य भानुजः कूर्म्मपत्रके ।
तत्र स्थाने महाविघ्नो जायते नात्र संशयः ॥
दुष्टस्थाने गते चन्द्रे कर्त्तव्यं शान्तिपौष्टिकम्" ॥

तच्चक्रमध्यस्था देशाः ।

"मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
पञ्चालशाल्वमाण्डव्यकुरुक्षेत्रगजाह्वयाः ॥
मरुनैमिषविन्ध्याद्रिपाण्ड्यघोषाः सयामुनाः ।
काश्ययोध्या प्रयागश्च गया वैदेहकादयः" ॥

तत्र पूर्व्वस्थदेशाः ।

"प्राच्यां मागधशोणौ च वारेन्द्रोगौड़रा ढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः" ॥

तत्राग्निकोणस्थदेशाः ।

"आग्नेय्यामङ्गवङ्गोपवङ्गत्रैपुरकोशलाः ।
कलिङ्गौड्रान्ध्रकिष्किन्धाविदर्भशवरादयः" ॥

तत्र दक्षिणस्थदेशाः ।

"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः ।
चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्कणाः ।
कावेरी ताम्रपर्णी च लङ्कात्रिकूटकादयः" ॥

तत्र नैरृतकोणस्थदेशाः ।

"नैरृते द्रविड़ानर्त्तमहाराष्ट्राश्च रैवतः ।
यवनः पह्नवः सिन्धुः पारसीकादयो मताः" ॥

तत्र पश्चिमस्थदेशाः ।

"पश्चिमे हैहयाऽस्ताद्रिम्लेच्छवासशकादयः" ॥

तत्र वायुकोणस्थदेशाः ।

"वायव्ये गुर्ज्जराटश्च नाटजालन्धरादयः" ॥

तत्र उत्तरस्थदेशाः ।

"उत्तरे चीननेपालकुनकैकेयमन्द्राः ।
गान्धारहिमवत्क्रौञ्चगन्धमादनमालवाः ।
कैलासमद्रकाश्मीरम्लेच्छदेशाः खसादयः" ॥

तत्रैशानकोणस्थदेशाः ।

"ऐशाने स्वर्णभौमश्च गङ्गाद्वारन्तु टङ्कणाः ।
वाह्लीकब्रह्मपुरककीराता दरदादयः" ॥

इति ज्योतिस्तत्त्वम् ॥ * ॥ जपयज्ञकर्म्मोक्तकमठाकारचक्रम् । तस्य लिखनक्रमः ।

"चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत् ।
पूर्व्वकोष्ठादि विलिखेत् सप्तवर्गाननुक्रमात् ॥
लक्षमीशे मध्यकोष्ठे स्वरान् युग्मक्रमाल्लिखेत् ।
दिक्षु पूर्व्वादितो यत्र क्षेत्राद्यक्षरसंस्थितिः ॥
मुखं तत्तस्य जानीयात् हस्तावुभयतः स्थितौ ।
कोष्ठे कुक्षी उभे पादौ द्वे शिष्टं पुच्छमीरितम् ॥
क्रमेणानेन विभजेन्मध्यस्थमपि भागतः" ॥ * ॥

तस्याङ्गविशेषे स्थितस्य जपादौ गुणदोषाः यथा ।

"मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः ।
उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात् ॥
पुच्छस्थः पीड्यते मन्त्री वन्धनोच्चाटनादिभिः ।
कूर्म्मचक्रमिदं प्रोक्तं मन्त्रिणां सिद्धिदायकम्" ॥ * ॥

तदज्ञाने दोषो यथा, पिङ्गलायाम् ।

"कूर्म्मचक्रमविज्ञाय यः कुर्य्यात् जपयज्ञकम् ।
तस्य यज्ञफलं नास्ति सर्व्वानर्थाय कल्पते" ॥

इति तन्त्रसारः ॥ (तन्त्रोक्तयज्ञीयमन्त्रशुभादिसूचककूर्म्माकारचक्रविशेषः । तत्स्वरूपादि रुद्रयामले उक्तम् । यथा ।

"कूर्म्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम् ।
यज्ज्ञात्वा सर्व्वशास्त्रार्थं जानाति पण्डितोत्तमः ॥
अभेद्यं भेदकं चक्रं शृणुष्वादरपूर्व्वकम् ।
कूर्म्माकारं महाचक्रं चतुष्पादसमावृतम् ॥
तुण्डे स्वरान्, दक्षपादे कवर्गं, वामपादके ।
चवर्गं, कीर्त्तितं पश्चात् अधःपादे टवर्गकम् ॥
तदधस्तु तवर्गः स्यादुदरे च पवर्गकम् ।
यवान्तं हृदये प्रोक्तं शहान्तं पृष्ठमध्यके ॥
लाङ्गूले शक्रवीजञ्च क्षकारं लिङ्गमध्यके ।
लिखित्वा गणयेन्मन्त्री चक्राकारं मलापहम् ॥
स्वरे लाभः कवर्गे श्रीश्चवर्गश्च विवेकदः ।
टवर्गे राजपदवी तवर्गे धनवान् भवेत् ॥
उदरे सर्व्वनाशः स्यात् हृदये गूढदुःखभाक् ।
पृष्ठे च सर्व्वसन्तापः लाङ्गूले मरणं ध्रुवम् ॥
वैष्णवे पृष्ठदेशे तु दुःखञ्च वामपादके ।
विरुद्धहृदयलाभे तु न कुर्य्याच्चक्रचिन्तनम् ॥
विरुद्धैके धर्म्मनाशो युग्मदोषे च मारणम् ।
यत्र देवाक्षरश्चास्ति तत्र चेन्निजवर्णकम् ॥
विरुद्धञ्च त्यजेच्चक्रमन्यमन्त्रं विचारयेत् ।
पृथक् होमे यदि भवेत् वर्णमाला महेश्वर ! ॥
यदि तत्सौख्यभावः स्यात् तत्सौख्यं नापि वर्ज्जयेत् ।
विभिन्नगेहे दोषश्चेत् शुभमन्त्रञ्च संत्यजेत् ॥
इति ते कथितं देव ! दृष्टादृष्टफलप्रदम् ।
ये शोधयन्ति चक्रेन्द्रं मन्त्रसिद्धिप्रदं शुभम्" ॥ * ॥

कूर्म्मरूपी विष्णुः केन रूपेण विराजते तत्संस्थानविवरणं मार्कण्डेयपुराणे ५८ अध्याये उक्तम् ।

तद्-यथा ।   क्रोष्टुकिरुवाच ।

"भगवन् ! कथितं सम्यक् भवता भारतं मम ।
सरितः पर्व्वता देशा ये च तत्र वसन्ति व ॥
किन्तु कूर्म्मस्त्वया पूर्व्वं भारते भगवान् हरिः ।
कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः ॥
कथं स संस्थितो देवः कूर्म्मरूपी जनार्द्दनः ॥